"गौर्भूत्वाश्रुमुखी खिन्ना रुदन्ती करुणं विभोः ॥"

खिरहिट्टी, स्त्री, महासमङ्गा । इति राजनिर्घण्टः ॥

खिलं, त्रि, (खिल् + कः ।) हलादिना अकृष्टभूमिः । खिल भूँइ इति भाषा ॥ तत्पर्य्यायः । अप्रहतम् २ । इत्यमरः । २ । १ । ५ ॥ सारसंक्षिप्ते वेधसि च पुं । इति मेदिनी ॥

"खिलो नारायणः प्रोक्त इषवस्तद्गुणाः स्मृताः ।" इति खिलेषु हरिवंशे इत्यत्र नीलकण्ठटीका ॥

खु, ङ ध्वनौ । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-अनिट् ।) ङ, खवते । इति दुर्गादासः ॥

खुङ्गाहः, पुं, (खुं इत्यव्यक्तशब्दं कुर्व्वन् गाहते रणस्थलं विलोडयतीति । गाह् + अच् ।) कृष्णवर्णघोटकः । इति हेमचन्द्रः ॥

खुज, उ स्तेये । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् । उदित्त्वात् क्त्वा वेट् ।) उ, खोजित्वा खुक्त्वा । स्तेयं चौर्य्यम् । इति दुर्गादासः ॥

खुञ्जाकः, पुं, (खुज् + आकः निपातनात् जस्य द्वित्वम् ।) देवताडवृक्षः । इति रत्नमाला ॥ खुञ्जाक इति क्वचित् पाठः ॥

खुड, इ ङ खञ्जे । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट्-इदित् ।) पञ्चमस्वरी । खञ्जः खोटनम् । इ, कर्म्मणि खुण्ड्यते । ङ, खुण्डते खोड़ः । इति दुर्गादासः ॥

खुड, क } भेदे । इति कविकल्पद्रुमः ॥
खुड, इ क } (चुरां-परं-सकं-सेट् । पाक्षिक इदित् ।) द्वौ पञ्चमस्वरिणौ । क, खोड़यति । द्वितीय आद्यस्वरीति कातन्त्राद्याः । स्वमते तु द्वितीयस्याद्यस्वरित्वे पूर्व्वोऽपीदनुबन्धः स्यात् । पञ्चमस्वरित्वे तु सजातीयस्य पुनःपाठात् पूर्व्वो नेदनुबन्धः । खुण्डयति । खण्डयतीति प्रयोगस्तु खडि इ मथौ इत्यस्मात् घञि खण्डं करोतीति णौ साध्यम् । तस्य भेदवाचित्वन्तु धातूनामनेकार्थत्वात् । इति दुर्गादासः ॥

खुर, श विलेखने । छेदने । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, खुरति भूमिं त्वचं वा लोकः । खोरिता । खुरः शफम् । इति दुर्गादासः ॥

खुरः, पुं, (खुर छेदने + कः । यद्वा "ऋच्छेन्द्राग्रवज्रेति ।" उणां । २ । २८ । इति रन् गुणाभावोऽन्त्यलोपश्च ।) शफम् । गवादीनां पादाग्रम् । (यथा, मनुः । ४ । ६७ ।

"न भिन्नशृङ्गाक्षिखुरैर्न वालधिविरूपितैः ॥")

कोलदलम् । नखीनामगन्धद्रव्यम् । इति मेदिनी ॥ छेदनवस्तु । नापितस्य खुरः । इति शब्दरत्नावली ॥ खट्टादीनां पादुकम् । इति धरणी ॥ खुरा इति भाषा ॥

खुरकः, पुं, (खुर + संज्ञायां कन् । खुरो गन्धद्रव्यविशेषः स इव कायति वा । कै + कः ।) तिलवृक्षः । इति शब्दचन्द्रिका ॥ (तिलशब्देऽस्य गुणादयो बोद्धव्याः ॥)

खुरणसः, त्रि, (खुर इव नासिका अस्य "अग्नासिकाया इति ।" ५ । ४ । ११८ । इति अच् नसादेशश्च "पूर्व्वपदात् संज्ञायामगः ।" ८।४।३ । इति णत्वम् ।) चिपिटनासिकः । इत्यमरः । २ । ६ । ४७ ॥ चेपटानाकयुक्त इति भाषा ॥

खुरणाः, त्रि, (खुर इव नासिका अस्य "खुरखराभ्यां वा नस् ।" इति नसादेशः "पूर्व्वपदादीति ।" ८ । ४ । ३ । इति णत्वं च ।) खुरणसः । इत्यमरः ।२।६।४७ ॥ छेपड़ानासिकायुक्त इति भाषा ॥

खुरप्रः, पुं, (खुर इव प्राति खुरास्त्रवत् कार्य्यं पूरयतीत्यर्थः । खुर + प्रा + कः ।) बाणविशेषः । इत्यमरटीकायां स्वामी ॥ खुरपा इति भाषा ॥

खुरली, स्त्री, (खुरैः सह विविधानि अस्त्रादीनि लाति पौनःपुन्येन शिक्षार्थमत्र । ला ग्रहणे + इन् + वा ङीष् ।) शराभ्यासः । इति हेमचन्द्रः ॥

खुराकः, पुं, (खुर + आकन् ।) पशुः । इत्युणादिकोषः ॥

खुरालकः, पुं, (खुर इव अलति पर्य्याप्नोतीति । अल + ण्वुल् ।) लौहमयबाणः । इति शब्दमाला ॥

खुरालिकः, पुं, (खुराणां आलिभिः कायति प्रकाशते । कै + कः ।) ग्रामणीभण्डः । नापितेर भाँड़ इति भाषा । नाराचः । उपधानम् । इति मेदिनी ॥ खरालिकोऽपि पाठः ॥

खुर्द्द, ङ क्रीड़ायाम् । इति कविकल्पद्रुमः (भ्वां-आत्मं-अकं-सेट् ।) पञ्चमस्वरी । दीर्घिणः पृथक्पाठात् पूर्व्वस्य न दीर्घः । ङ, खुर्द्दते । इति दुर्गादासः ॥

खुल्लं, क्ली, (क्षुद् + सम्पदादित्वात् क्विप् । क्षुदं लातीति । ला + कः । पृषोदरात् साधुः ।) नखीनामगन्धद्रव्यम् । इति शब्दचन्द्रिका ॥ क्षुद्रे नीचे च त्रि ॥

खुल्लकः, त्रि, (खुल्ल + स्वार्थे कन् ।) स्वल्पः । नीचः । कनिष्ठः । दरिद्रः । निष्ठुरः खलः । इत्यमरटीका ॥

खुल्लतातः, पुं, (खुल्लः कनिष्ठः तातस्य पितुरिति पूर्व्वनिपातः ।) पितृकनिष्ठभ्राता । इति शब्दरत्नावली ॥ खुड़ा इति भाषा ॥

खुल्लमः, पुं, (खुल्लेन मीयते इति । मा + घञर्थे कः ।) पन्थाः । इति त्रिकाण्डशेषः ॥

खूर्द्द, ङ क्रीड़ायाम् । इति कविकल्पद्रुमः ॥ (भ्वां-आत्मं-अकं-सेट् ।) षष्ठस्वरी । ङ, खूर्द्दते । इति दुर्गादासः ॥

खेखीरकः, पुं, (खे आकाशे खीलक इव लस्य रत्वम् ।) शब्दवती यष्टिः । इति हारावली ॥

खेगमनः, पुं, (खे आकाशे गमनं अस्य ।) कालकण्ठपक्षी । इति शब्दमाला ॥

खेचरः, पुं, (खे चरतीति । चर + "चरेष्टः ।" ३ । २ । १६ । इति टः । अलुक् समासः ।) शिवः । इति शब्दरत्नावली ॥ विद्याधरः । इति जटाधरः ॥ पारदः । इति राजनिर्घण्टः ॥ आकाशचारिणि त्रि ॥

("इतो हन्ति जराव्याधिं मूर्च्छितो व्याधिघातकः । बद्धः खेचरतां धत्ते कोऽन्यः सूतात् कृपाकरः ॥" इति वैद्यकरसेन्द्रसारसंग्रहे जारमारणाधिकारः ॥

मेषादिराशिः । यथा ज्योतिषतत्त्वे—"खेचराश्च सर्व्वे ॥")

खेचरान्नं, क्ली, (खेचरं द्विदलादिमिश्रितं अन्नम् ।) द्विदलादिसहितपक्वतण्डुलम् । खिचड़ीति भाषा ॥ इति पाकराजेश्वरः ॥

खेट, त् क भक्षणे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) अचिखेटत् । इति दुर्गादासः ॥

खेटं, क्ली, (खे + अट् + अच् ।) तृणम् । इति शब्दरत्नावली ॥ खेड्मपि पाठः ॥

खेटः, पुं, (खे आकाशे अटति । अट् + अच् ।) ग्रहः । यथा, भावविवेके ।

"यस्मिन् राशौ स्थितः खेटस्तेन तं परिपूरयेत् ॥"

खेटः, त्रि, (खिट् + अच् । खेट् + कः वा ।) अधमः । इत्यमरः ।३।१।५४ ॥ घोटकः । इति शब्दरत्नावली ॥ सुनिन्दकः । इति विश्वः ॥ सुनन्दक इति पाठे बलरामस्य गदा इति कश्चित् ॥

खेटः, पुं, क्ली, (खिद्यते भयस्तत्पद्यते अस्मादनेन वा । खिट् + अपादाने करणे वा घञ् ।) मृगया । इत्यमरहेमचन्द्रौ ॥ कफः । (खेद्यते भक्ष्योपयोगिशस्त्रादिना उपजीव्यते अस्मात् ।) ग्रामभेदः । स तु कर्षकग्रामः । (तथा च भागवते । १ । ६ । ११ ।

"खेटखर्व्वटवाटीश्च वनान्युपवनानि च ॥"

"खेटाः कर्षकग्रामाः ।" इति श्रीधरस्वामी ॥)

चर्म्म । इति मेदिनीशब्दरत्नावल्यौ ॥

खेटकः, पुं, (खेट + स्वार्थे कः ।) ग्रामभेदः । चासार गाँ इति भाषा ॥ इति जटाधरः ॥ फलकम् । इति हेमचन्द्रः ॥ "खेटकं वसुनन्दके ।" इति हारावली ॥ वसुनन्दको धनदहस्तिजीवकः । इति तट्टीका ॥ बलदेवस्य गदा इति कश्चित् ॥

खेटः } पुं, (खेटति भयस्तत्पादयत्यनेन । खिट्
खेटकः } + करणे घञ् । खेट + स्वार्थे कः ।) यष्टिः । यथा,—

"यष्टिरूपेण खेट ! त्वमरिसंहारकारकः ।
देवीहस्तस्थितो नित्यं मम रक्षां कुरुष्व च ॥"
इति शारदीयदुर्गापूजापद्धतौ अस्त्रपूजाप्रकरणम् ॥

"खेटकं पूर्णचापञ्च पाशमङ्कुशमेव च ॥"
इति च तत्र दशभुजाया दुर्गाया ध्यानम् ॥

खेटितालः, पुं, (खे अटतीति अट् इन् । खिट् + इन् वा । खेटिः तालोऽस्य ।) वैतालिकः । इति शब्दमाला ॥

खेटी, [न्] पुं, (खेट् + णिनिः ।) नागरः । कामी । इति शब्दमाला ॥

खेड, त् क भक्षणे । इति कविकल्पद्रुमः ॥ (अदन्त-चुरां-परं-सकं-सेट् ।) अचिखेडत् । इति दुर्गादासः ॥